विश्वकल्याणम्
|| चतुस्सागर पर्यन्तं गो ब्राह्मणेभ्य: शुभं भवतु ||

# श्री कुंजिका स्तोत्रं

## शिव उवाच

शृणु देवि प्रवक्षयामि कुञ्जिका स्तोत्र मुत्तमम् |
येन मन्त्र प्रभावेण चण्डीजाप: शुभो भवेत् || १ ||

न कवचं नार्गला स्तोत्रं कीलकं न रहस्यकम् |
न सूक्तं नापि ध्यानं च न न्यासो न च वार्चनम् || २ ||

कुञ्जिकापाठ मात्रेण दुर्गापाठ फलं लभेत् |
अति गुह्यतरं देवि देवानामपि दुर्लभम् || ३ ||

गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति |
मारणं मोहनं वश्यं स्तम्भनोच्चाटनादिकम् |
पाठमात्रेण संसिद्धयेत् कुञ्जिकास्तोत्र मुत्तमम् || ४ ||

## अथ मन्त्र:

ऐं ह्ली कीं चामुण्डायै विच्चे
ग्लौं हुं कीं जूं स: ज्वालय ज्वालय ज्वल ज्वल प्रज्वल प्रज्वल
ऐं ह्ली कीं चामुण्डायै विच्चे  ज्वल हं सं लं क्षं फट् स्वाहा

नमस्ते रुद्ररूपिण्यै नमस्ते मधुमर्दिनि |
नम: कैटभहारिण्यै नमस्ते महिषर्दिनि || १ ||
नमस्ते शुम्भहन्यै च निशुम्भासुर घातिनि || २ ||

जाग्रतं हि महादेवि जपं सिद्धं कुरुष्व मे |
ऐंकारी सृष्टिरूपायै ह्लींकारी प्रतिपालिका || ३ ||





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

कींकारी कामरूपिण्यै बीजरूपे नमोऽस्तु ते |
चामुण्डा चण्डघाती च यैकारी वरदायिनी || ४ ||

विच्चे चाभयदा नित्यं नमस्ते मन्त्ररूपिणि || ५ ||

धां धीं धूं धूर्जटे: पत्नी वां वीं वूं वागधीश्वरी |
क्रां क्रीं क्रूं कालिका देवि शां शीं शूं मे शुभं कुरु || ६ ||

हुं हुं हुंकाररूपिण्यै जं जं जं जम्भनादिनी |
भ्रां भ्रीं भ्रूं भैरवी भद्रे भवान्यै ते नमो नम: || ७ ||

अं कं चं टं तं पं यं शं वीं दुं ऐं वीं हं क्षं |
धिजाग्रं धिजाग्रं त्रोटय त्रोटय दीप्तं कुरु कुरु स्वाहा || ८ ||

पां पीं पूं पार्वती पूर्णा खां खीं खूं खेचरी तथा |
सां सीं सूं सप्तशती देव्या मन्त्रसिद्धिं कुरुष्व मे || ९ ||

इदं तु कुञ्जिका स्तोत्रं मन्त्रजागर्ति हेतवे |
अभक्ते नैव दातव्यं गोपितं रक्ष पार्वति || १० ||

यस्तु कुञ्जिकया देवि हीनां सप्तशतीं पठेत् |
न तस्य जायते सिद्धिररण्ये रोदनं यथा || ११ ||

**इति श्री कुंजिका स्तोत्रं सम्पूर्ण**





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133